CHAPTER-5

# सुक्तिमौक्तिकम्

## QUESTION BANK

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥

I. एकपदेन उत्तरत–

(i) किं श्रुत्वा अवधार्यताम्?

(ii) श्रुत्वा किं कर्तव्यम्?

II. पूर्णवाक्येन उत्तरत–

(i) अस्माभिः किं न समाचरेत्?

(ii) आत्मनः प्रतिकूलानि केषाम् न समाचरेत्?

III. भाषिककार्यम्–

(i) 'आचरणं कर्तव्यम्' इति पदस्य किं पर्यायपदं पद्यांशे प्रयुक्तम्?

(ii) 'अवधार्यताम्' इति क्रियापदस्य कर्ता कः?

(iii) 'अनुकूलानि' इत्यस्य कः विपर्ययः अत्र प्रयुक्तः?

(iv) 'श्रूयतां धर्मसर्वस्वम्' अत्र क्रियापदं किमस्ति?

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता॥

I. एकपदेन उत्तरत–

(i) जन्तवः केन प्रसीदन्ति?

(ii) सर्वदा कीदृशं वाक्यं वक्तव्यम्?

II. पूर्णवाक्येन उत्तरत–

(i) कुत्र दरिद्रता न भवति?

(ii) किम् प्रदानेन सर्वे जन्तवः तुष्यन्ति?

III. भाषिककार्यम्–

(i) 'प्राणिनः' इति पदस्य पर्यायपदं किम्?

(ii) 'सम्पन्नता' इति पदस्य कः विपर्ययः अत्र प्रयुक्तः?

(iii) 'जन्तवः' इति कर्तृपदस्य क्रियापदं किम्?

(iv) 'सर्वे तुष्यन्ति जन्तवः' अत्र विशेषणपदं किम्?

पिबन्ति नद्यः स्वयमेव नाम्भः, स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः॥

I. एकपदेन उत्तरत–

(i) स्वयमेव अम्भः काः न पिबन्ति?

(ii) वृक्षाः किं न खादन्ति?

II. पूर्णवाक्येन उत्तरत–

(i) सज्जनानाम् विभूतयः किमर्थं भवति?

(ii) वारिवाहाः किं न खादन्ति?

III. भाषिककार्यम्–

(i) 'अन्नम्' इति अर्थे किं पदं प्रयुक्तम्?

(ii) 'नद्यः' इति कर्तृपदस्य क्रियापदं किम्?

(iii) 'स्वयं न खादन्ति फलानि वृक्षाः' अत्र कर्तृपदं किम्?

(iv) 'स्वार्थाय' इति पदस्य कः विपर्ययः अत्र प्रयुक्त?

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः॥

I. एकपदेन उत्तरत–

(i) पुरुषैः केषु प्रयत्नः कर्तव्यः?

(ii) पुरुषैः कदा प्रयत्नः कर्तव्यः?

II. पूर्णवाक्येन उत्तरत–

(i) कैः सदा गुणेष्वेव प्रयत्नः कर्तव्यः।

(ii) गुणयुक्तः दरिद्रः अपि कैः समः न भवति।

III. भाषिककार्यम्–

(i) 'कर्तव्यः' इति क्रियापदस्य कर्ता कः?

(क) पुरुषः (ख) पुरुषैः (ग) पुरुषम् (घ) पुरुषाय

(ii) 'धनिकः' इति पदस्य विलोमपदं किम् प्रयुक्तम्?

(क) दरिद्रः (ख) अगुणः (ग) पुरुषः (घ) प्रयत्नः

(iii) 'मानवैः' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

(क) गुणैः (ख) पुरुषैः (ग) ईश्वरैः (घ) सदैव

(iv) 'ईश्वरैः गुणैः' अत्र विशेष्यपदं किम्?

(क) ईश्वरैः (ख) गुणैः (ग) समः (घ) ईश्वरः

आरम्भगुर्वी क्षयिणी क्रमेण, लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम्॥

I. एकपदेन उत्तरत–

(i) केषाम् मैत्री आरम्भगुर्वी भवति?

(ii) केषाम् मैत्री पश्चात् वृद्धिमती भवति?

II. पूर्णवाक्येन उत्तरत–

(i) दिनस्य पूर्वार्द्धछायेव केषाम् मैत्री भवति?

(ii) दिनस्य अपरार्द्धछायेव केषाम् मैत्री भवति?

III. भाषिककार्यम्–

(i) 'लघ्वी' इति पदस्य विपर्ययपदं किं प्रयुक्तम्?
(क) पुरा (ख) पश्चात् (ग) गुर्वी (घ) च

(ii) 'भवति' इति क्रियापदस्य कर्तृपदं किमस्ति?
(क) छाया (ख) इव (ग) मैत्री (घ) खल

(iii) 'मित्रता' इति पदस्य कः पर्यायः अत्र प्रयुक्तः?
(क) लघ्वी (ख) क्षयिणी (ग) मैत्री (घ) क्रमेण

(iv) 'भिन्ना छायेव मैत्री' अत्र विशेषणपदं किम्?
(क) भिन्ना (ख) छाया (ग) मैत्री (घ) एव

गुणा गुणज्ञेषु गुणा भवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः, समुद्रमासाद्य भवन्त्यपेयाः॥

I. एकपदेन उत्तरत–

(i) निर्गुणं प्राप्य गुणाः किं भवन्ति?

(ii) गुणाः केषु गुणाः भवन्ति?

II. पूर्णवाक्येन उत्तरत–

(i) कीदृश्यः नद्यः प्रवहन्ति?

(ii) समुद्रमासाद्य नद्यः कीदृश्यः भवन्ति?

III. भाषिककार्यम्–

(i) 'नद्यः' इति कर्तृपदस्य क्रियापदं किम्?
(क) आस्वाद्य (ख) तोयः (ग) प्र (घ) प्रवहन्ति

(ii) 'आसाद्य' इति पर्यायपदं पद्यांशे किम् अस्ति?
(क) तोयम् (ख) अपेयाः (ग) प्राप्य (घ) आस्वाद्य

(iii) 'दोषाः' इति पदस्य कः विपर्ययः अत्र प्रयुक्तः?
(क) नद्यः (ख) गुणाः (ग) गुणज्ञेषु (घ) तोयम्

(iv) 'अपेयाः' इति विशेषणपदस्य विशेष्यपदम् अत्र किम्?
(क) गुणाः (ख) दोषाः (ग) नद्यः (घ) दोषाः

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥

अन्वयः– धर्मसर्वस्वं श्रूयतां (*i*) ............... च (*ii*) ............... अवधार्यताम्। (*iii*) ............... प्रतिकूलानि (*iv*) ............... न समाचरेत्।

मञ्जूषा

| परेषाम्, श्रुत्वा, एव, आत्मनः |
|---|

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता॥

अन्वयः– सर्वे जन्तवः (*i*) ............ प्रदानेन (*ii*) ............... , तस्मात् (*iii*) ............... एव (*iv*) ............... , वचने का दरिद्रता।

मञ्जूषा

| वक्तव्यम्, प्रियवाक्य, तुष्यन्ति, तत् |
|---|

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः॥

अन्वयः– पुरुषैः (*i*) ............... गुणेषु (*ii*) ............... हि प्रयत्नः (*iii*) ............... दरिद्रः (*iv*) ............... गुणयुक्तः (नरः) ईश्वरैः अगुणैः समः (न भवति)।

मञ्जूषा

| अपि, एव, कर्तव्यः, सदा |
|---|

आरम्भगुर्वी क्षयिणी क्रमेण, लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम्॥

अन्वयः– आरम्भगुर्वी (*i*) ............... क्षयिणी, पुरा (*ii*) ............... पश्चात् च वृद्धिमती, (*iii*) ............... पूर्वार्द्ध (*iv*) ............... च छाया इव खलसज्जनानां मैत्री भिन्ना (भवति)।

मञ्जूषा

| अपरार्द्ध, दिनस्य, लघ्वी, क्रमेण |
|---|

यत्रापि कुत्रापि गता भवेयुर्हंसा महीमण्डलमण्डनाय।
हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः॥

अन्वयः– (*i*) ............... यत्र अपि (*ii*) ............... अपि (*iii*) ............... भवेयुः, (तत्र) महीमण्डलमण्डनाय (एव)। हानिः तु (*iv*) ............... सरोवराणां हि भवति येषां मरालैः सह विप्रयोगः (भवति)।

मञ्जूषा

| हंसाः, तेषाम्, गताः, कुत्र |
|---|